# shrI akkalakoTasvAmI kavacha stotram

# શ્રીઅક્કલકોટસ્વામીકવચમ્સ્તોત્રમ્

## Document Information

Text title : akkalakoTasvAmIsamarthavajrakavachaM

File name : akkalakoTasvAmIkavacha.itx

Category : kavacha, deities_misc, gurudev

Location : doc_deities_misc

Author : Prithviraj Bhalerao

Transliterated by : Anand Kulkarni

Proofread by : Anjali Leley leley98 at hotmail.com, Sunder Hattangadi Avinash Sathaye sohum at ms.uky.edu, Mukund Hanumante mukund at juno.com

Latest update : August 31, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# શ્રીઅક્કલકોટસ્વામીકવચમ્સ્તોત્રમ્

ૐ ।
અસ્ય શ્રી સ્વામી કવચ સ્તોત્રમંત્રસ્ય ।
સુવ્રત ઋષિઃ ।  અનુષ્ટુપ્ છંદઃ ।
સ્વામી સમર્થ દેવતા ।
શઙ્કરરાજે શક્તિઃ ।
બાળાપ્પા કીલકમ્ ।
મમ સકલાભીષ્ટપ્રાપ્ત્યર્થં  પાઠે વિનિયોગઃ ।
। અથ કરન્યાસઃ ।
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ॥
ૐ હ્રીં તર્જનીભ્યાં નમઃ ॥
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ ॥
ૐ હ્રૈં અનામિકાભ્યાં  નમઃ ॥
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ॥
ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં  નમઃ ॥
॥ અથ ષડઙ્ગન્યાસઃ ॥
ૐ હ્રાં હૃદયાય નમઃ ॥
ૐ હ્રીં શિરસે સ્વાહા ॥
ૐ હ્રૂં શિખાયૈ વષટ્ ॥
ૐ હ્રૈં કવચાય હું ॥
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ॥
ૐ હ્રઃ અસ્ત્રાય ફટ્ ॥

॥ અથ ધ્યાનમ્ ॥

ભૂમાનંદં સહજસુખદં કેવલં બ્રહ્મમૂર્તિમ્ ।
વિશ્વાતીતં વિમલહૃદયં વેદવેદાન્ત વેદ્યમ્ ॥ ૧॥

શાન્તં દાન્તં સરલમનસં સર્વસામર્થ્યરૂપમ્ । ഀ
સર્વાતીતં હ્યમરમચલં સ્વામિનં તં નમામિ ॥ ૨॥

ૐ શીર્ષં મે પાતુ સ્વામી વૈ ।
ભાલં નેત્રે ચ સદ્ગુરુઃ ॥ ૧॥

કણ્ઠં મુખઞ્ચ પાતુ મે ।
સ્વામીસમર્થ દેશિકઃ ॥ ૨॥

સ્કન્ધૌ મે પાતુ સ્વામી વૈ ।
બાહૂ પાતુ તુ સદ્ગુરુઃ ॥ ૩॥

કરૌ મે પાતુ સ્વામી ચ ।
અઙ્ગુલયશ્ચ દેશિકઃ ॥ ૪॥

પ્રજ્ઞાપ્રાકારવાસી વૈ ।
હૃદયં પાતુ મે સદા ॥ ૫॥

ઉરઃ સ્થલઞ્ચ સ્વામી વૈ ।
કટિં મધ્યં હિ સદ્ગુરુઃ ॥ ૬॥

નાભિં જઙ્ઘે ચ સ્વામી વૈ ।
ગુહ્યં પાતુ ચ દેશિકઃ ॥ ૭॥

ઊરૂ  જાનુ સમર્થશ્ચ ।
પાદૌ સ્વામી ચ પાતુ મે ॥ ૮॥

દેહં મનશ્ચ પ્રજ્ઞાઞ્ચ ।
પ્રજ્ઞાપુરસ્થિતઃ સદા ॥ ૯॥

દશદિક્ષુ સ પાતુ માં ।
સ્વામીસમર્થ સદ્ગુરુઃ ॥ ૧૦॥

ઉત્પાતાન્ત્રિવિધાન્નિત્યં ।
નષ્ટાન્ કુર્વન્તુ સદ્ગુરુઃ ॥ ૧૧॥

સંકટાનાધિવ્યાધીંશ્ચ ।
નશ્યન્તુ દેશિકઃ સદા ॥ ૧૨॥

નાનાપીડાંશ્ચ બાધાંશ્ચ જરામરણયાતનાઃ ।
પ્રાતિકૂલ્યાદિવિઘ્નાંશ્ચ નશ્યન્તુ સદ્ગુરુઃ સદા ॥ ૧૩॥

ભૂતપ્રેતપિશાચાંશ્ચ વેતાલબ્રહ્મરાક્ષસાન્ ।
શાકિનિડાકિન્યાદીંશ્ચ નશ્યન્તુ સ્વામીસમર્થઃ ॥ ૧૪॥

મહાપાપાંશ્ચ ઘોરાંશ્ચ બ્રહ્મહત્યાદિદુર્ધરાન્ ।
સમૂલાન્પાતકાન્નિત્યં નશ્યન્તુ સદ્ગુરુસ્તથા ॥ ૧૫॥

સ્વામી સમર્થ તેજશ્ચ રક્ષતુ માઞ્ચ સર્વદા ।
ભૂત્વા તત્કવચં મે ચ અભેદ્યં તત્ભવેત્સદા ॥ ૧૬॥

વજ્રકવચમિદં વૈ ચ યઃ પઠેદ્ભક્તિમાન્નરઃ ।
તીર્ત્વા ચ સંકટાન્ઘોરાન્ સર્વતઃ સુખમાપ્નુયાત્ ॥ ૧૭॥

પ્રતિદિનં પઠેદ્યો ભક્તો ભાવપૂરિતચિત્તતઃ ।
સંસારસાગરં તીર્ત્વા ભુક્તિં મુક્તિઞ્ચ વિન્દતિ ॥ ૧૮॥

સાધકો યો યદિચ્છેચ્ચ ગુરુભક્તો હિ વર્તતે ।
પ્રસન્નો તસ્મિન્હિ ભૂત્વા ચ કૃપાલુર્ભવતિ શીઘ્રતઃ ॥ ૧૯॥

સ્વામીસમર્થપ્રસાદશ્ચ કવચં જાનયેદ્ બુધઃ ॥

સચ્છિષ્યાય ભક્તાય દાતવ્યં ન ચ કર્હિચિત્ ॥ ૨૦॥

અતિદિવ્યં કવચં શ્રેષ્ઠં દત્તં મે સ્વામિનાઽધુના ।
અહં દદામિ શિષ્યાય પ્રકાશાય પ્રિયાય ચ ॥ ૨૧॥

ઇદં કવચં તસ્મૈ વૈ શુભં કરોતિ સર્વદા ।
સર્વેષાં મંગલં ભૂયાત્ દિવ્યં કવચમેવ ચ ॥ ૨૨॥

સદિચ્છાં  પ્રકટીકૃત્વા સમાપનં કરોમ્યહમ્ ।
નત્ત્વા સ્વામીસમર્થં ચ નમામિ શ્રીધરં ગુરુમ્ ॥ ૨૩॥

પ્રકાશસ્ય નિમિત્તેન પ્રકાશિતમિદં સ્તવઃ ।
તર્હિ તત્પ્રતિ ચાશીંશ્ચ દદામિ ચ પુનઃ પુનઃ ॥ ૨૪॥

અક્કલકોટવાસી ચ સ્વામીસમર્થ સદ્ગુરુઃ ।

ભૂયાત્ સર્વમાંગલ્યં સર્વેષામિતિ પ્રાર્થયે ॥ ૨૫॥

॥ ઇતિ સુવ્રતવિરચિતં સ્વામીસમર્થવજ્રકવચં સમાપ્તમ્ ॥

Composed by Prithviraj Bhalerao

Encoded by Anand Kulkarni

*shrI akkalakoTasvAmI kavacha stotram*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*